Total Pages – 4 B.A. RNLKWC-/SANS/GE-2/22

2022

# SANSKRIT

## B.A. Second Semester End Examination - 2022

## PAPER - GE-2

*Full Marks : 60* *Time : 3 hours*

*The figures in the right-hand margin indicate marks.*
*Candidates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

**A. यथाकामं संस्कृत भाषया देवनागरीलिप्या च दश प्रश्नाः समाधेयाः** **2×10=20**

1. 'रघुवंशम्' कीदृशं काव्यम्? रघुवंशे कियन्तः सर्गाः सन्ति?

2. रघुवंशमिति महाकाव्यस्य उत्सः कोऽस्ति? अस्य महाकाव्यस्य प्रथमसर्गस्य नाम किमस्ति?

*(Turn Over)*

Scanned with CamScanner

3. कालिदासस्य साहित्यनिचयः कोऽस्ति?

4. 'कुमारसम्भवम्'-इति नाम्नः कोऽर्थः? कुमारसम्भवस्य मुख्यरसः कः?

5. पार्वत्याः पितरौ कौ स्तः? कुमारसम्भवस्य नायकः कः भवति?

6. सहचरीमुखेन पार्वती पितरं किम् अयाचत? पार्वती हिमालयस्य कुत्र तपश्चर्यां कृतवती?

7. किरातार्जुनीयमिति ग्रन्थस्य रचयिता कः भवति? तत्र कति सर्गाः सन्ति?

8. किरातार्जुनीयमिति महाकाव्यस्य उत्सः कः? अस्य महाकाव्यस्य नायकः कः?

9. कः खलु किंसखा? कस्तावत् किंप्रभुः?

10. किं नाम शतककाव्यम्? उदाहरणम् एकं दीयताम्।

11. गङ्गायाः अवतरणपर्यायानि उल्लिख्यन्ताम्।

12. नीतिशतकस्य मङ्गलश्लोकं लिखत।

13. काव्यं कतिविधम्? श्रव्यकाव्यं किमस्ति?





14. महाकाव्यस्य नायकः कः भवति? महाकाव्यस्य मुख्यफलं किं भवति?

15. अश्वघोषस्य समयकालः कः आसीत्? तस्य भिन्ननाम किमासीत्?

B. यथानिर्देशं समाधेयाः। 5×4=20

1. क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

अथवा

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥

2. मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

अथवा

अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत्।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति॥

3. कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥



Scanned with CamScanner

अथवा

तथापि जिह्म: स भवज्जिगीषया तनोति शुभ्रंगुणसम्पदा यश:।
समुन्नयन् भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभि:॥

4. अज्ञ: सुखमाराध्य: सुखतरमाराध्यते विशेषज्ञ:।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति॥

अथवा

टीकां कुरुत – मेघदूतम्।

C. **द्वौ समाधत्त।**

1. रघुवंशमिति महाकाव्यस्य प्रथमसर्गानुसारेण महाराजदिलीपस्य चरित्रमालोचयत।
2. कुमारसम्भवमिति महाकाव्ये प्रतिफलिता पार्वत्या: तपस्या वर्णनीया।
3. 'भारवेरर्थगौरवम्'—उदाहरणसहयोगेन वर्णयत।
4. कालिदासविरचितस्य महाकाव्यद्वयस्य विषयवस्तु आलोचयत।



Scanned with CamScanner